Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 3 | ISSN : 2582-0095

# भाषाविज्ञानदृष्ट्या उत्कल-संस्कृत-मैथिलीभाषाणां द्वितीयाविभक्तिविमर्शः



**गौतमकुमारराजहंसः**
**शोधार्थी,**
**श्रीसदाशिवपरिसरः, पुरी**
**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**Article Info**
Volume 4 Issue 3
Page Number: 10-18

**Publication Issue :**
May-June-2021

**Article History**
Accepted : 15 May 2021
Published : 30 May 2021

**शोधपत्रसारांशः -** अस्मिन् संसारे मानवव्यवहारस्य प्रधानाधारः भाषा। मानवस्य सर्वविधचिन्तनं भाषामाध्यमेन बहिर्भूत्वा समाजं , राष्ट्रं किञ्च समग्रं विश्वमुपकरोति। एवं कस्याश्चित्भाषायाः मानकस्वरूपं ज्ञातुं व्याकरणज्ञानं यावत् अनिवार्यं ततोऽप्यधिकं भाषाविज्ञानस्य ज्ञानमनिवार्यमिति मन्ये।
भाषाविज्ञानदृष्ट्या चिन्तयामश्चेत् सर्वस्यां भारतीयार्यभाषायां संस्कृतस्य महान्प्रभावो वर्तते। तत्रापि मागध्याः विकसितायां मैथिल्याम् उत्कलभाषायाञ्च भूयान्प्रभावो दृश्यते। कस्यापि भाषाप्रयोक्तुः सम्पूर्णर्थावबोधनाय प्रत्येकं भाषासु वाक्यानि प्रयुज्यन्ते । वाक्येषु यानि सुबन्तपदानि भवन्ति तानि कारकपदानि अपि उच्यन्ते । कारकज्ञानं विभक्तिज्ञानं विना वा वाक्यानि प्रयोक्तुं न शक्यन्ते। यथा संस्कृतभाषायां विभक्तयः सन्ति तथैव उत्कलभाषायां मैथिल्यां च विद्यन्ते। विभक्ति इति पूर्वाचार्यकृता संज्ञा। परम्परायाम् उक्तमस्ति – **संख्याकारकबोधयित्री विभक्तिः।** पाणिनीयमते तु सुप्तिङौ विभक्तिसंज्ञौ स्तः।[1] ओडियासर्वसारव्याकरणे अपि उच्यते - **याहाद्वारा संख्या ओ कारकर प्रतीति जन्मे ताहाकु विभक्ति बोलायाए।**[2] प्रायशः मैथिल्यामपि इत्थमेव परिभाष्यते। वस्तुतः मैथिलीभाषा प्रतिपदं पाणिनिव्याकरणमनुकरोति।
उत्कलभाषया सह मैथिल्या अस्ति समीपतरः सम्बन्धः। न केवलम् उत्कलभाषया अपितु असमीबङ्गभाषाभ्यां साकमस्याः नैकट्यं स्पष्टतया संलक्ष्यते। वस्तुतः उत्कल-मैथिली-बङ्ग-आसामीभाषाः परस्परं

[1] विभक्तिश्च –पा.सू.01.04.104

[2] सर्वसारव्याकरणम् (ओडिया) पृ.43

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

न्यूनाधिक्यरूपेण साम्यं **स्थापयन्ति**। अतएव ग्रियर्सनमहोदयः युगपत् चतसृणां भाषाणां व्याकरणं कर्तुं शक्यते इति प्रोक्तवान् ।
अत: शोधपत्रेऽस्मिन् उत्कल-संस्कृत-मैथिलीभाषाणां द्वितीयाविभक्तिविषयिणी भाषावैज्ञानिकी कीदृशी चिन्तनधारा, किञ्च साम्यं वैषम्यं वा प्रवर्तते इति समुद्घाटयितुं प्रयतिष्ये। अत्र तिसृणामपि उत्कलसंस्कृतमैथिलीभाषाणां भाषाविज्ञानदृशा द्वितीयाविभक्तेः तौलनिकमध्ययनं प्रस्तोस्यते।

**कूटशब्दाः** – भाषाविज्ञानम्, संस्कृतम्, उत्कलभाषा, मैथिली, कारकम्, विभक्तिः, पाणिनि-व्याकरणम्, ओडिया सर्वसार व्याकरण, मिथिलाभाषाविद्योतनम्

---

**1.1 प्रस्तावना –**

भाष् व्यक्तायां वाचि इत्यस्माद्धातोः **गुरोश्चहलः**[3]इति सूत्रेण अ प्रत्यये स्त्रीत्वविवक्षायां टापि सुपि च कृते भाषेति पदनिष्पत्तिः।

भाष्यते व्यक्तवाग्रूपेण अभिव्यज्यते इति भाषा। भाषायाः लक्षणमेवमपि वक्तुं शक्यते –

**स्फुटवाक्करणोपात्तो भावाभिव्यक्तिस्साधकः।**
**सङ्केतितो ध्वनिव्रातः सा भाषेत्युच्यते बुधैः**[4]।।

सामान्यतो वक्तुं शक्यते यत् – येन साधनेन मानवः परस्परं भावाभिव्यक्तिङ्करोति सा भाषा इति। पाश्चात्यभाषाशास्त्रिणां मते तु –

**A language is a system of arbitrary vocal symbol by means of which social groups cooperate.**[5]

अर्थात् भाषा **यादृच्छिक –वाचिक-ध्वनिसंकेतानामेका प्रणाली वर्तते यया मानवः परस्परं विचारविनिमयं कुरुते।** इयं भाषैव समग्रप्रपञ्चस्य सर्वोत्तमा ज्योतिः, या मानवस्य अन्तः- करणान्धकारं दूरीकरोति। अनयैव संसारस्य अखिलानि कार्याणि प्रवर्तन्ते। नेदं कल्पयितुं शक्येत यद् भाषामन्तरा मानवस्य का गतिरभविष्यत्? इति।

---

[3] अ.सू. 3.3.102

[4] भा.वि,भा.शा पृ.30

[5] Outlines of linguistic analysis, P.Blooch & G.L. D.Trager, P.5

कस्यापि भाषायाः साधुस्वरूपमवगन्तुं तस्याः व्याकरणं सरलं स्पष्टञ्च साधनं भवति। व्याकरणेनैव भाषा सुव्यवस्थिता परिष्कृता च तिष्ठति। लौकिकवैदिकोभयविधसाहित्यस्य यथार्थबोधः व्याकरणाधीनो वर्तते।

यथा भाषा नियमान् ज्ञातुं व्याकरणज्ञानमनिवार्यं, तथैव व्याकरणनियमानां ज्ञानार्थं भाषायाः आन्तरिकस्वरूपस्य व्याख्यायै च भाषा विज्ञानस्य अनिवार्यता वर्तते। वस्तुतस्तु कस्या अपि भाषायाः वैज्ञानिकदृष्ट्या स्वरूपनिर्धारणं भाषाविज्ञानेनैव सिध्यति।

## 1.2 भाषाविज्ञानस्य परिभाषाः –

**भाषायाः विज्ञानं भाषाविज्ञानं किं वा भाषाविज्ञानं नाम यत्र भाषाविषयकं सर्वविध-विवेचनात्मकमध्ययनं प्रस्तूयते तदेव भाषाविज्ञानमिति। तथा हि –**

**भाषायाः यत्तु विज्ञानं सर्वाङ्गं व्याकृतात्मकम्।**
**विज्ञानदृष्टिमूलं तत् भाषाविज्ञानमुच्यते।।**[6]

भाषाविज्ञानमपि विज्ञानस्यांशभूतं वर्तते। भाषाविज्ञानस्य विचारेण भाषाणां निदानं सुतरां ज्ञायते। यतो हि तत्र भाषा कथमागता? कुतः आगता? कस्माज्जाता? स्वाभाविकी अस्वाभाविकी वा? इयं भाषा सृष्टेः प्रागासीन्न वा? अथवा तदनन्तरं मानवैर्निर्मिता? नित्यानित्या वा? इयं भाषा विभिन्नेषु देशेषु कथं भिद्यते? देशेष्वपि भिन्न-भिन्न प्रदेशेषु कथं भिद्यते का प्रकृतिः? कश्च प्रत्ययः? पूर्वं व्याकृता अव्याकृता वेति बहुविधाः प्रश्नाः जायन्ते। अमीषां प्रश्नानामुत्तराणि पाश्चात्यैर्भारतीयैर्वा भाषाविज्ञानविद्भिर्यथावसरं दीयन्ते। अतः भाषाविज्ञानमन्तरा भाषाणां मूलभूतं रहस्यं कदापि ज्ञातुं न शक्यते।

## 1.3 भारतीयं भाषाविज्ञानम् –

संस्कृतवाङ्मये निरुक्तं, व्याकरणं ,शिक्षा चेति वेदाङ्गत्रये भाषावयवानां शब्दानां निर्वचनं सम्यक्तया उपलभ्यते। अत्र भाषाविज्ञानस्य प्राचीनं नाम तु निरुक्तं, निर्वचनं, शब्दशास्त्रमिति ज्ञायते। निरुक्तन्तावच्छब्दानान्निर्वचनङ्करोति। तत्र प्रकृति प्रत्ययादीनां विवेचनं, कथं वा तत्तदर्थेषु शब्दानां शक्तिग्रहस्य त्यागः भवतीति विचारः क्रियते। अत्र अव्युत्पन्नानां शब्दानां साधुत्वमपि प्रदर्शितं दृश्यते। निरुक्ते शब्दानां साधुत्वन्निर्वचनं वा पञ्चधा क्रियते-

---

[6]भा.वि.भा.शा. पृ 06

**वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।**
**धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ।।**[7]

**अथ च –**

**भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्।**
**गूढोऽऽत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्।।**[8]

अत इदं सिद्ध्यति यत् –निरुक्तं भाषाविज्ञानमेव।

**व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्।** एतदर्थमेव संस्कृतव्याकरणस्य जनिरभूत्। संस्कृतव्याकरणावबोधाय पाणिनिविरचिताष्टाध्यायी प्राधान्यं स्थानमावहति। पाणिनीयसूत्रेषु कात्यायनेन वार्तिकाणि महर्षिणा पतञ्जलिना च भाष्याणि विरचितानि। अतो मुनित्रयविरचितमिदं व्याकरणं त्रिमुनिव्याकरणनाम्ना प्रसिद्धिमगात्।व्याकरणं हि साक्षात् भाषाविज्ञानपदं लब्धुन्नार्हति, यतो हि व्याकरणं भाषाणां सिद्धस्वरूपं बोधयति। भाषाविज्ञानं तु तन्मूलं किमिति विचारयति। व्याकरणं सर्वथा भाषास्वरूपसङ्घटनाय न व्याक्रियते अपि तु भाषावयवभूतानि पदानि व्याकरोति। यद्यपि महर्षिः पाणिनिः सूत्रेषु क्वचित्-क्वचित् भाषाविज्ञानांशानपि निवेशितवान् तथापि **तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यें स्वार्थसाधकं च** इत्यादि निरुक्तवचनेन स्पष्टं भवति यत् व्याकरणं भाषाविज्ञानमनुसरतीति।

### 1.4 भाषाविज्ञानस्य भेदाः-

तुलनात्मकभाषाविश्लेषणे भाषाज्ञानस्य मुख्यतः चत्वारि अङ्गानि स्वीक्रियन्ते। तानि च –

1. ध्वनिविज्ञानम्-(Phonology)
2. पदविज्ञानम् (Morphology)
3. वाक्यविज्ञानम्(Syntax)
4. अर्थविज्ञानम्(Semantics)

अत्र मम विवेच्यविषयः वाक्यविज्ञाने अन्तर्भवति।

---

[7]नि.रु.1.1.1

[8]वै.सि.कौ.समासाश्रयप्रकरणे (पृषोदरादीनि यथोपदिष्टम्-06.03.109)

## 1.5 कारकं विभक्तिश्च-

अस्मिन् संसारे मानवव्यवहारस्य प्रधानाधार: भाषा। मानवस्य सर्वविधचिन्तनं भाषामाध्यमेन बहिर्भूत्वा समाजं , राष्ट्रं किञ्च समग्रं विश्वमुपकरोति। एवं कस्याश्चित्भाषाया: मानकस्वरूपं ज्ञातुं व्याकरणज्ञानं यावत् अनिवार्यं ततोऽप्यधिकं भाषाविज्ञानस्य ज्ञानमनिवार्यमिति मन्ये।

भाषाविज्ञानदृष्ट्या चिन्तयामश्चेत् सर्वस्यां भारतीयार्यभाषायां संस्कृतस्य महान्प्रभावो वर्तते। तत्रापि मागध्या: विकसितायां मैथिल्याम् उत्कलभाषायाञ्च भूयान्प्रभावो दृश्यते। कस्यापि भाषाप्रयोक्तु: सम्पूर्णर्थावबोधनाय प्रत्येकं भाषासु वाक्यानि प्रयुज्यन्ते । वाक्येषु यानि सुबन्तपदानि भवन्ति तानि कारकपदानि अपि उच्यन्ते । कारकज्ञानं विभक्तिज्ञानं विना वा वाक्यानि प्रयोक्तुं न शक्यन्ते। यथा संस्कृतभाषायां विभक्तयः सन्ति तथैव उत्कलभाषायां मैथिल्यां च विद्यन्ते।

क्रियान्वयित्वं कारकत्वम् । अर्थात् क्रियया सह यस्य साक्षात् अन्वयो भवति तद् कारकमिति ज्ञायते। व्याकरणशास्त्रे कारकं किञ्चन महत्त्वपूर्णं प्रकरणं भवति। वाक्यप्रयोगे कारकस्य ज्ञानं विशिष्टं स्थानम् आवहति। संस्कृतव्याकरणे कारकं षड्विधं भवति। यथा –

**कर्ता कर्म च करणञ्च सम्प्रदानं तथैव च ।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्**[9] **।।**

एवमेव मिथिलाभाषाविद्योतने अपि कारकं षड्विधमेव प्रतिपादितं दृश्यते - **क्रियान्वयी कारक, छओ प्रकारक – कर्ता, कर्म, करण, सम्प्रदान, अपादान, अधिकरण**[10]-इति ।

उत्कलभाषाव्याकरणे कारकविषये प्रतिपाद्यते यत् **– येषां पदानां क्रियया साकं प्रत्यक्षसम्बन्धो विद्यते तानि कारकाणि भवन्ति।**[11]

विभक्ति इति पूर्वाचार्यकृता संज्ञा। परम्परायाम् उक्तमस्ति – **संख्याकारकबोधयित्री विभक्तिः।** सुप्तिङौ विभक्तिसंज्ञौ स्तः। अष्टाध्याय्यां विभक्तिश्च[12] इति सूत्रेण विभक्तिसंज्ञा क्रियते। एवमेव दिक्शब्देभ्यः प्राग् वक्ष्यमाणाः प्रत्ययाः अपि विभक्तिसंज्ञां लभन्ते।[13] पाणिनिः विभक्तिसंज्ञया प्रत्ययान् बोधयति।

---

[9]परमलघुमंजूषा,कारकनिरुपणम्।

[10]मिथिलाभाषाविद्योतन, विभक्त्यर्थ, सू.1

[11] ओडियाव्याकरणम् ,मा.शि.परिषद्

[12] विभक्तिश्च –पा.सू.01.04.104

[13] प्राग्दिशो विभक्तिः-पा.सू.05.03.01

पदमरीकारः हरदत्तः प्रतिपादयति – **विभक्तिशब्दः सुपां वाचकः , कारकशक्तिवचनो वा , विभज्यते अनया प्रातिपदिकार्थः इति कृत्वा** ।[14]

ओडियासर्वसारव्याकरणे अपि उच्यते - **याहाद्वारा संख्या ओ कारकर प्रतीति जन्मे ताहाकु विभक्ति बोलायाए।**[15] प्रायशः मैथिल्यामपि इत्थमेव परिभाष्यते। वस्तुतः मैथिलीभाषा प्रतिपदं पाणिनि-व्याकरणमनुकरोति। इयं विभक्तिः मुख्यतः द्विविधा साकल्येन त्रिधा। यथा- 1.कारकविभक्तिः 2.उपपदविभक्तिः 3.साधारणविभक्तिश्च।

क्रियामाश्रित्य उत्पन्ना विभक्तिः कारकविभक्तिः। यथा- रामः ग्रामं गच्छति।[16] पदमाश्रित्य उत्पन्ना विभक्तिः उपपदविभक्तिः। यथा- ज्ञानान् ऋते न मुक्तिः। मासं गुडधानाः, मासम् अधीते, क्रोशं कुटिला नदी[17] चेत्यादीनि साधारणविभक्त्युदाहरणानि।

उत्कलभाषया सह मैथिल्या अस्ति समीपतरः सम्बन्धः। न केवलम् उत्कलभाषया अपितु असमीबङ्गभाषाभ्यां साकमस्याः नैकट्यं स्पष्टतया संलक्ष्यते। वस्तुतः उत्कल-मैथिली-बङ्ग-आसामीभाषाः परस्परं न्यूनाधिक्यरूपेण साम्यं स्थापयन्ति। अतएव ग्रियर्सनमहोदयः युगपत् चतसृणां भाषाणां व्याकरणं कर्तुं शक्यते इति प्रोक्तवान् ।

### 1.6 उत्कलसंस्कृतमैथिलीनां द्वितीयाविभक्तिविश्लेषणम्-

अधुना एतासां भाषाणां निम्नरीत्या द्वितीयाविभक्तिविषयकं तौलनिकं विश्लेषणं प्रस्तूयते-

संस्कृतव्याकरणे कर्मसंज्ञानिमित्तम् अनेकानि सूत्राणि सन्ति। अत्र संज्ञानन्तरं विभक्तिविधानं भवति। महर्षि-पाणिनिः मुख्यतः दशसंख्यकसूत्रैः कर्मकारकं प्रतिपादयति । एषु सूत्रेषु वार्तिकाणि अपि सन्ति। कर्मसंज्ञायाः फलं तु एकमेव कर्मणि द्वितीया[18] इत्यनेन द्वितीयाविभक्तिः। मुख्यरूपेण कर्म द्विविधं साकल्येन सप्तविधम्। कर्तुरीप्सिततमं कर्म[19] इति सूत्रेण भगवान् पाणिनिः ईप्सिततमकर्म प्रतिपादयति।यथा- रामः ग्रामं गच्छति। संस्कृतभाषायां द्वितीयाविभक्तौ अम् औट् शस् चेत्येषां संकेतानां प्रयोगो भवति। अम् औट् शस् इति द्वितीया[20]।

---

[14] पा.सू.- एकविभक्ति चापूर्वनिपाते-01.02.44

[15] सर्वसारव्याकरणम् (ओडिया) पृ.43

[16] पा.सू. कर्मणि द्वितीया-02.03.02

[17] पा,सू. कालाध्वनोरत्यन्तसंयोगे -02.03.05

[18] पा.सू.02.03.02

[19] पा.सू.01.04.49

[20] पा.सू.- स्वौजसमौट्.........04.01.02

एवमेव उत्कलभाषायामपि द्वितीयाविभक्तिनिमित्तं संकेतानां प्रयोगो दृश्यते। यथा तत्र कु ङ्कु मानङ्कु चेत्यादीनां संकेतानां प्रयोगः द्वितीयाचतुर्थ्योः भवति।

| विभक्तिः | संस्कृतम् | उदाहरणम् | उत्कलभाषा | उदाहरणम् |
|---|---|---|---|---|
| द्वितीया | अम् | रामः मन्दिरं गच्छति | कु, ङ्कु ,मानङ्कु | तुमे मन्दिरकु याअ। |
| चतुर्थी | ङे | भिकुक्षाय भिक्षां देहि। | कु | भिखारिकु भिक्षा दिअ। |

संस्कृते संकेतानां प्रयोगः अवश्यं करणीयः परम् उत्कलभाषायां संकेतानां प्रयोगाभावेऽपि अर्थवोधो भवति । यथा – मुँ गाँ यिवि। राम भात खाउछि । अत्र राम, भात कर्मपदम् । उभयत्र द्वितीयाविभक्तिः। अतः ज्ञायते यत् संकेताभावेऽपि विभक्तिर्भवति। यथा संस्कृतव्याकरणेन अकर्मकधातूनां योगे कर्मसंज्ञा तथैव उत्कलभाषायां भवति।

| विभक्तिः | संस्कृतम् | उदाहरणम् | उत्कलभाषा | उदाहरणम् |
|---|---|---|---|---|
| द्वितीया | अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्।[21] | कुरून् स्वपिति। मासम् आस्ते। गोदोहम् आस्ते। क्रोशम् आस्ते।। | -------------------- | सैन्यमाने सातदिन यात्रा कले। पढारे रातियाक कटाइलि। से दशहात डेइँला। |

अत्र  सातदिन ,रातियाक , दशहात कर्मपदानि सन्ति।

यथा संस्कृतभाषायाम् उपपदविभक्तिः विद्यते तथैव उत्कलभाषायामपि अस्ति। यथा – संस्कृते- चौरं धिक् । उत्कलभाषायाम् – चोरकु धिक् । उत्कलभाषायां निकटार्थक-दूरार्थकयोः द्वितीया । यथा-

[21] वार्तिकम् ।

1.पुरीकु सत्यवादी पाकोश। 2.राम घरकु मंदिर लागिछि।
उत्कलभाषावत् मैथिलीभाषायामपि संकेतानां प्रयोगो विलोक्यते। अत्रापि द्वितीयाचतुर्थ्योः समानः संकेतः। यथा-

| विभक्तिः | संस्कृतम् | उदाहरणम् | मैथिली | उदाहरणम् |
|---|---|---|---|---|
| द्वितीया | अम् | रामं पश्य | कैं | रामकैं देखू। |
| चतुर्थी | ङे | भिकुक्षाय भिक्षां देहि। | कैं | भिखारिकैं भीख दू। |

## 1.7 उपसंहार

संस्कृतव्याकरणे तु द्वितीयाविभक्तिविमर्शः महान् विद्यते। तत्र कारकविभक्तिदृष्ट्या उपपदविभक्तिदृष्ट्या चोभयथा विचारः कृतोऽवलोक्यते। विवृते लघुशोधनिबन्धेऽस्मिन् स्थालीपुलाकन्यायेन वक्तुं शक्यते यत् भाषाविज्ञानदृष्ट्या संस्कृत-उत्कल-मैथिलीभाषासु द्वितीयाविभक्तिसम्बन्धि न्यूनाधिक्यरूपेण परस्परं साम्यं वैषम्यं चविद्यते।

**सन्दर्भग्रन्थसूची-**


1. अष्टाध्यायी- पाणिनिः , शिवसंस्कृतसंस्थानम् , वाराणसी ,2003
2. ओडियासर्वसारव्याकरणम्
3. गोणिका,श्रीसदाशिवपरिसरः,पुरी,2015-16
4. निरुक्तम् – सम्पादकः,प्रो. उमाशंकरशर्मा ऋषि, चौखम्बा विद्याभवन, वाराणसी,1989
5. भाषाविज्ञान एवं भाषाशास्त्र – डा.कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी,2010
6. भाषाविज्ञान तथा लिपिविज्ञान – प्रो. ब्रह्मचारी सुरेन्द्र कुमार , नालंदा मुक्त विश्वविद्यालय, पटना ,2009
7. मिथिलाभाषा विद्योतन,दीनबंधु झा,मैथिली-साहित्य-परिषत्,दरभंगा,1993
8. मैथिली-परिशीलन,पं.गोविन्द झा,मैथिली अकादमी ,पटना,2012

9. लघुसिद्धान्तकौमुदी- पं.सदाशिवशास्त्री , चौखम्बा संस्कृत सीरीज ,वाराणसी ,2014
10. वैयाकरणसिद्धान्तकौमुदी – डा. अर्कनाथ चौधरी , जगदीश संस्कृत पुस्तकालय , जयपुर,2015
11. संस्कृतभाषाविज्ञानम् – चक्रवर्ती श्रीरामाधीनचतुर्वेदी , चौखम्बा विद्याभवन, वाराणसी,2011
12. Linguistic Analysis of Paninian Grammar – Dr.Shashibhushan Mishra , The Banaras Mercantile Co. Kolkata,2012
13. Outlines of linguistic analysis, B.Bloch & G.L.Trager, Linguistic Society of America, 1942